## 86 - षडशीतितम दशकम्
## साल्व वधम्, महाभारत युद्धम् च

साल्वो भैष्मी विवाहे यदुबल विजित: चन्द्रचूडाद् विमानं
विन्दन् सौभं स मायी त्वयि वसति कुरुन् त्वत्पुरी मभ्यभाङ्क्षीत् ।
प्रद्युम्नस् तं निरुन्धन् निखिल यदु भटै: न्यग्रही दुग्र वीर्यं
तस्यामात्यं द्युमन्तं व्यजनि च समर: सप्त विंशत्यहान्त: ॥ ॥86-1॥

तावत्-त्वम् रामशाली त्वरित मुपगत: खण्डित प्राय सैन्यं
सौभेशं तं न्यरुन्धा: स च किल गदया शार्ङ्ग मभ्रंशयत् ते ।
माया तातं व्यहिंसीत् अपि तव पुरत: तत् त्वयापि क्षणार्धं
नाज्ञायीत्याहु रेके तदिद मवमतं व्यास एव न्यषेधीत् ॥ ॥86-2॥

क्षिप्त्वा सौभं गदा चूर्णितम् उदकनिधौ मङ्क्षु साल्वेऽपि चक्रेण
उत्कृत्ते दन्त वक्त्र: प्रसभ मभि पतन् अभ्य मुञ्चद् गदां ते ।
कौमोदक्या हतोऽसावपि सुकृत निधिश् चैद्यवत् प्रापदैक्यं
सर्वेषा मेष पूर्वं त्वयि धृत मनसां मोक्षणार्थोऽवतार: ॥ ॥86-3॥

त्वय्यायातेऽथ जाते किल कुरु सदसि द्यूतके संयताया:
क्रन्दन्त्या याज्ञसेन्या: सकरुण मकृथा: चेल माला मनन्ताम् ।
अन्नान्त प्राप्त शर्वांशज मुनि चकित द्रौपदी चिन्तितोऽथ
प्राप्तश् शाकान्न मश्नन् मुनिगण मकृथा: तृप्ति मन्तं वनान्ते ॥ ॥86-4॥

युद्धो द्योगेऽथ मन्त्रे मिलति सति वृत: फल्गुनेन त्वमेक:
कौरव्ये दत्त सैन्य: करि पुर मगमो दौत्य कृत् पाण्डवार्थम् ।
भीष्म द्रोणादि मान्ये तव खलु वचने धिक्कृते कौरवेण
व्यावृण्वन् विश्वरूपं मुनि सदसि पुरीं क्षोभयित्वा गतोऽभू:॥ ॥86-5॥

जिष्णोस् त्वं कृष्ण सूतः खलु समर मुखे बन्धु घाते दयालुं
खिन्नं तं वीक्ष्य वीरं किमिदमयि सखे नित्य एकोऽय मात्मा ।
को वध्यः कोऽत्र हन्ता तदिह वध भियं प्रोज्झ्य मय्यर्पितात्मा
धर्म्यं युद्धं चरेति प्रकृति मनयथाः दर्शयन् विश्वरूपम् ॥ ॥86-6॥

भक्तोत्तंसेऽथ भीष्मे तव धरणि भर क्षेप कृत्यैक सक्ते
नित्यं नित्यं विभिन्दति अयुत समधिकं प्राप्तसादे च पार्थे ।
निश् शस्त्रत्व प्रतिज्ञां विजह दरिवरं धारयन् क्रोधशालीव
आधावन् प्राञ्जलिं तं नत शिरस मथो वीक्ष्य मोदा दपागाः॥ ॥86-7॥

युद्धे द्रोणस्य हस्ति स्थिर रण भगदत् तेरितं वैष्ण वास्त्रं
वक्षस् याधत्त चक्र स्थगित रवि महाः प्रार्दयत् सिन्धु राजम् ।
नागास्त्रे कर्णमुक्ते क्षिति मवनमयन् केवलं कृत्त मौलिं
तत्रे तत्रापि पार्थं किमिव नहि भवान् पाण्डवाना मकार्षीत् ॥॥86-8॥

युद्धादौ तीर्थ गामी स खलु हलधरो नैमिश क्षेत्र मृच्छन्
अप्रत्युत्थायि सूत क्षय कृदथ सुतं तत्पदे कल्पयित्वा ।
यज्ञघ्नं वल्वलं पर्वणि परिदलयन् स्नात तीर्थो रणान्ते
सम्प्राप्तो भीम दुर्योधन रण मशमं वीक्ष्य यातः पुरीं ते ॥ ॥86-9॥

संसुप्त द्रौपदेय क्षपण हत धियं द्रौणि मेत्य त्वदुक्त्या
तन्मुक्तं ब्राह्म मस्त्रं समहृत विजयो मौलि रत्नं च जह्रे ।
उच्छित्यै पाण्डवानां पुनरपि च विशति त्तरा गर्भ मस्त्रे
रक्षन् अङ्गुष्ठमात्रः किल जठर मगाः चक्रपाणिर् विभो त्वम् ॥ 86-10॥

धर्मौघं धर्म सूनोः अभिदध दखिलं छन्द मृत्युस् स भीष्म
त्वां पश्यन् भक्ति भूम्नैव हि सपदि ययौ निष्कल ब्रह्म भूयम् ।
संयाज्या थाश्वमेधैः त्रिभिरति महितैः धर्मजं पूर्णकामं
संप्राप्तो द्वरकां त्वं पवन पुरपते पाहि मां सर्वरोगात् ॥ ॥86-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥